# Dhumravarna Stotram Shri Shivakritam

# શ્રીશિવકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

## Document Information

Text title : Dhumravarna Stotram Shri Shivakritam

File name : dhUmravarNastotramshrIshivakRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 16 | 8.16 5-34||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીશિવકૃતં ધૂમ્રવર્ણસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
નમસ્તે ધૂમ્રવર્ણાય નાનાખેલકરાય ચ ।
અમેયશક્તયે તુભ્યં માયિને ધર્મરક્ષિણે ॥ ૫॥
અનાથાનાં પ્રણાથાય નાથનાથાય તે નમઃ ।
સગુણાય નમસ્તુભ્યં નિર્ગુણાય નમો નમઃ ॥ ૬॥
સગુણનિર્ગુણાભ્યાં ચ હીનાય યોગરૂપિણે ।
યોગાકારેણ સર્વત્ર સંસ્થિતાય નમો નમઃ ॥ ૭॥
નરકુઞ્જરરૂપાય ધૂમ્રવર્ણધરાય ચ ।
દ્વિભુજાયાશ્વવાહાય હેરમ્બાય નમો નમઃ ॥ ૮॥
ખડ્ગચર્મધરાયૈવ નાના ચન્દનચર્ચિત ।
નાના પુષ્પધરાયૈવ સર્વાધ્યક્ષાય તે નમઃ ॥ ૯॥
પૂર્ણાય પૂર્ણરૂપાય ગણેશાય પરાત્મને ।
ધર્મરક્ષ મહાભાગ ગજાનન નમોઽસ્તુ તે ॥ ૧૦॥
ધર્માન્ના અમરાઃ સર્વે સુરેશ્વર કૃતાસ્ત્વયા ।
નષ્ટે ધર્મેઽધુના નાથ મરિષ્યામસ્ત્વદગ્રતઃ ॥ ૧૧॥
બુદ્ધમાયાસહાયેન કલિના નિર્જિતા વયમ્ ।
વિષ્ણુશમ્ભુમુખા દેવાસ્તાન્ પાલય મહોદર ॥ ૧૨॥
સાર્ધેન દ્વિસહસ્રેણ પ્રભો વર્ષૈર્વિનિર્જિતાઃ ।
ક્ષુદ્રદેવાઃ સ્વગ્રામસ્થાઃ કલિના પપલુશ્ચ તે ॥ ૧૩॥
તતઃ પઞ્ચસહસ્રેણ વર્ષૈસ્તાસ્તીર્થદેવતાઃ ।
તીર્થાનિ કલિના નાથ જિતાનિ પપલુસ્તથા ॥ ૧૪॥
તતો દશસહસ્રેણ જિતા વિષ્ણુશિવાદયઃ ।
કલિના પૃથિવીં ત્યક્ત્વા પપલુર્દેવસત્તમાઃ ॥ ૧૫॥
કર્માકર્મવિકર્માખ્યા શક્તિસ્તત્ર સ્થિતા ભવેત્ ।
વિકર્મગુણસંયુક્તા બુદ્ધમાયાત્મિકા પ્રભો ॥ ૧૬॥

ત્વમપિ ત્વાદૃશો ભૂત્વા ફલદાતા સ્થિતઃ સ્વયમ્ ।
દેવરૂપધરઃ સ્વામિન્ સદા કલિપ્રવર્તકઃ ॥ ૧૭॥
ન તે દેવસ્વરૂપં તુ કલિઃ ક્રોધસમન્વિતઃ ।
છેત્તું સમુદ્યતઃ ક્વાપિ ત્વાં ચિન્તયતિ સર્વદા ॥ ૧૮॥
તવ ચિન્તનભાવેન વયં સર્વે પરાજિતાઃ ।
કલિના દેવદેવેશ ઉપોષણયુતાઃ કૃતાઃ ॥ ૧૯॥
અધુના લેશમાત્રેણ ધર્મસ્તિષ્ઠતિ વિઘ્નપ ।
તં હનિષ્યતિ વેગેન કલિઃ પરમદારુણઃ ॥ ૨૦॥
નષ્ટે ધર્મે ગણાધીશ અધર્મઃ કેવલો મહાન્ ।
ભવિષ્યતિ પુનર્ધર્મં કિં સ્રક્ષ્યસિ ચ દેવપ ॥ ૨૧॥
અતો લેશમયં ધર્મં રક્ષસ્વ ગણનાયક ।
નોચેદ્ધર્મશરીરાસ્તુ વયં નષ્ટા ભવામહે ॥ ૨૨॥
રક્ષ રક્ષ દયાસિન્ધો ધૂમ્રવર્ણ ગજાનન ।
મૃત્યુપ્રાયાનનાથાંશ્ચ દેવાન્ ધર્મપ્રરક્ષકાન્ ॥ ૨૩॥
એવમુક્ત્વા ગણાધીશં પ્રણેમુરમરાઃ પુનઃ ।
રુરુદુર્દુઃખસંયુક્તાંસ્તાન્ જગાદ ગજાનનઃ ॥ ૨૪॥
(ફલશ્રુતિઃ)
ધૂમ્રવર્ણ ઉવાચ ।
મા ભયં કુરુત પ્રાજ્ઞા ધર્મં સંરક્ષયામ્યહમ્ ।
સર્વૈરજેયમુગ્રં તં કલિં હત્વા વિશેષતઃ ॥ ૨૫॥
ભવત્કૃતમિદં સ્તોત્રં કલિદોષહરં ભવેત્ ।
પઠતે શ‍ૃણ્વતે દેવાઃ સર્વસિદ્ધિપ્રદાયકમ્ ॥ ૨૬॥
ધનધાન્યપ્રદં ચૈવારોગ્યસમ્પત્પ્રવર્ધનમ્ ।
પુત્રપૌત્રકલત્રાદિદાયકં પ્રભવિષ્યતિ ॥ ૨૭॥
એવમુક્ત્વા સ્વદેહાત્ સ ધૂમ્રવર્ણઃ પ્રતાપવાન્ ।
નિર્મમે વિવિધાં સેનાં નાનાશસ્ત્રસમન્વિતામ્ ॥ ૨૮॥
નાનાવાહનગાં પૂર્ણતેજોયુક્તાં મહર્ષયઃ ।
તયા યુક્તો જનાન્ સર્વાન્ જઘાન મલિનાન્ પ્રભુઃ ॥ ૨૯॥
મ્લેચ્છપ્રાયાંશ્ચ વિવિધાન્ મ્લેચ્છાન્ કલિમલૈર્યુતાન્ ।
સ્વયં સન્ત્રાસયામાસ કલિં ધર્મવધે રતમ્ ॥ ૩૦॥
તસ્યાઙ્ગવાયુના સ્પૃષ્ટા જના ધર્મપરાયણાઃ ।
ભયયુક્તા ગણેશં તે શરણં જગ્મુરાદરાત્ ॥ ૩૧॥

કલિર્ગુપ્તસ્વરૂપેણ યુયુધે જનસંશ્રિતઃ ।
ગણેશૈઃ સંહતઃ સોઽપિ બભૂવ હ હતોદ્યમઃ ॥ ૩૨॥
તતો ભયસમાયુક્તં ત્યક્ત્વા હૃજ્જન્મિનાં કલિઃ ।
દેહધારી સમાગત્ય ધૂમ્રવર્ણં નનામ સઃ ॥ ૩૩॥
તુષ્ટાવ પૂજ્ય તં નત્વા ધૂમ્રવર્ણં મહાબલમ્ ।
જ્ઞાત્વા વિઘ્નેશ્વરં ભક્ત્યા હૃષ્ટરોમા મહાયશાઃ ॥ ૩૪॥

ઇતિ શ્રીશિવકૃતં ધૂમ્રવર્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૬ । ૮.૧૬ ૫-૩૪॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 16 . 8.16 5-34..

Proofread by Yash Khasbage, Preeti Bhandare

*Dhumravarna Stotram Shri Shivakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*